# संस्कृतवार्ताः

दिनाङ्क :-31.03.2025

प्रात: - 06:55

प्रधानमन्त्री - छत्तीसगढस्य

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः छत्तीसगढस्य बिलासपुरमण्डले मोहभट्टायां सप्तशतोत्तर-त्रयस्त्रिंशत्-सहस्रकोटितोप्यधिक-रुप्यकाणां बहुविधविकास-परियोजनानां उद्घाटनं, शिलान्यासं राष्ट्राय समर्पणं च विहितम्। अस्मिन् अवसरे जनसभां सम्बोधयन् प्रधानमन्त्रिणा उक्तं यत् छत्तीसगढस्य नक्सलप्रभावितक्षेत्रेषु स्थिरशान्तेः नवयुगं दृश्यते। अस्मिन् अवसरे प्रधानमन्त्री-आवास-योजनायाः (ग्रामीणवर्गस्य) त्रिलक्षं यावत् लाभार्थिनां गृहप्रवेशोपि अभवत्। प्रधानमन्त्रिणा अस्याः योजनायाः त्रिलक्ष लाभार्थिभ्यः गृहाणां कुञ्चिकाः समर्पिताः।

मनकीबात कार्यक्रमः

प्रधानमन्त्री नरेन्द्रमोदी ह्य: आकाशवाणीतः प्रसार्यमाने मनकीबात इत्येतस्मिन् कार्यक्रमे उक्तवान् यत् वस्त्रापशिष्टानां समाह्वानानि समग्रविश्वाय व्याकुलतायाः एकं बृहत्तमं कारणं विद्यते। असौ प्रावोचत् यत् एकप्रतिशतादपि अल्पानां वस्त्रापशिष्टानां नवीनवस्त्रेषु पुनर्चक्रणं भवन्तीति। अनेनोक्तं यत् भारतं विश्वस्य तृतीये देशो विद्यते यत्र सर्वाधिकं वस्त्रापशिष्टम् अपसारितं भवति परञ्च हर्षस्य विषयोऽयं विद्यते यत् अस्माकं देशे एतेभ्यः समाह्वानेभ्यः निवारणाय अनेकाः प्रशंसनीयप्रयासाः विधीयन्ते।

अत्रावधौ जलसंरक्षण विषये प्रवदन् प्रधानमन्त्री सन्तोषं प्रकटितवान् यत् विविधेषु राज्येषु जलसञ्चय - सम्बद्धेषु कार्येषु तीव्रता समागतास्ति। श्रीमोदिना अग्रे कथितं यत् अस्मिन्नेव वर्षेऽपि "कैच द रेन" इत्यस्मै अभियानाय युद्धस्तरे व्यवस्थाः सम्पादिताः। श्रोतॄन् च समाहूतवान् यत् ते इदमभियानम् जनान्दोलनत्वेन निर्मातुं कार्यं कुर्वन्तु इति।

ईद-उल-फित्र

अशेष-देशेऽद्य ईद-उल-फित्र पारम्परिकरीत्या आमान्यते। जनै: ईदगाह-मस्जिद-तीर्थ-स्थलेषु नमाज-प्रार्थिता। अवसरेऽस्मिन् द्रौपदी-मुर्मु-वर्यया देशवासिन: ईद-उल-फित्र-इत्यस्य शुभकामना: प्रसारिता:। श्रीमत्या मुर्मुवर्यया भणितं यत् ईद-पर्व-परस्पर-हर्ष-वितरण-पर्व-विद्यते। पर्व-इदं एकता-सद्भाव-सौहार्द-भावनां विवर्धयति। एतेन सहैव उपराष्ट्रपतिना अपि देशवासिन: शुभासिता:।

गंगोत्री धाम:

उत्तराखण्डस्य श्रीगंगोत्री धाम्नः-द्वारस्य उद्घाटनम् अस्मिन् वर्षे अप्रैल मासस्य त्रिंशत्दिनाङ्के प्रातः सार्धदशवादने अक्षयतृतीयायाः अवसरे भविष्यति। श्रीगङ्गोत्री मन्दिरसमित्या मुखवायां एकस्यां सभायां एतस्य आशयस्य निर्णयः कृतः। श्रीयमुनोत्री धाम्नः द्वाराणि अपि तस्मिन् दिने उद्घाटितानि भविष्यन्ति। यमुनोत्री धाम्नः द्वारोद्घाटनस्य समयस्य घोषणा यमुना जयंत्यावसरे यमुनोत्री मन्दिरसमित्या अप्रैल तृतीयदिनाङ्के क्रियते। श्रीबद्रीनाथ-केदारनाथ मंदिर समित्याः वार्ताप्रभारी डॉ. हरीशगौर: उक्तवान् श्रीबद्रीनाथ एवं श्रीकेदारनाथ धाम्नोः द्वाराणां उद्घाटनस्य तिथि: समय: पूर्वमेव प्रसारितं वर्तते। श्रीबद्रीनाथ धाम्नः द्वारं मई चतुर्थे दिनाङ्के प्रातः षड्वादने, श्रीकेदारनाथ धाम्नः द्वारं मई द्वितीये दिनाङ्के प्रातः सप्तवादने उद्घाटितं भविष्यति।

क्रिकेट-आईपीएल:

इण्डियन प्रीमियरलीग्-इत्यस्यां क्रिकेट् क्रीडा-मालिकायां गुवाहाट्या: बरसापारा-क्रीडाङ्गणे गतरात्रौ राजस्थान-रॉयल्स-इत्यनेन दलेन चेन्नई-सुपर-किङ्ग्स्-इत्येतं दलं षड् धावनांकै: पराजितम्। अपरत्र दिल्ली-कैपिटल्स-दलेन सनराइजर्स-हैदराबाद-इत्येतं-दलं सप्तस्तोभै: पराजितम्। प्रतियोगितायां अद्य मुम्बईया: वानखेड़े क्रिकेट क्रीडाङ्गणे मुम्बई इंडियन्स दलं कोलकाता नाइटराइडर्स दलं सम्मुखिकरिष्यति। क्रीडाया: प्रसारणं सायं सार्धसप्तवादने भविष्यति।